श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ चतुस्त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुस्त्रिंशः सर्गः ॥

## रावणेन पृष्टया शूर्पणखया तस्मै सीतालक्ष्मणसहितस्य श्रीरामस्य परिचयं दत्त्वा सीतां भार्यात्वेन ग्रहीतुं तस्य प्रेरणम्

ततः शूर्पणखां दृष्ट्वा ब्रुवन्तीं परुषं वचः।
अमात्यमध्ये सङ्क्रुद्धः परिपप्रच्छ रावणः॥ **3.34.1** ॥

कश्च रामः कथंवीर्यः किंरूपः किम्पराक्रमः।
किमर्थं दण्डकारण्यं प्रविष्टश्च सुदुस्तरम्॥ **3.34.2** ॥

आयुधं किं च रामस्य येन ते राक्षसा हताः।
खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा॥ **3.34.3** ॥

तत्त्वं ब्रूहि मनोज्ञाङ्गि केन त्वं च विरूपिता।
इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्छिता॥ **3.34.4** ॥

ततो रामं यथान्यायमाख्यातुमुपचक्रमे।
दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः॥ **3.34.5** ॥

कन्दर्पसमरूपश्च रामो दशरथात्मजः।
शक्रचापनिभं चापं विकृष्य कनकाङ्गदम्॥ **3.34.6** ॥

दीप्तान् क्षिपति नाराचान् सर्पानिव महाविषान्।
नाददानं शरान् घोरान् विमुञ्चन्तं महाबलम्॥ **3.34.7** ॥

न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे।
हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः ॥ **3.34.8** ॥

इन्द्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः।
रक्षसां भीमवीर्याणां सहस्राणि चतुर्दश ॥ **3.34.9** ॥

निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना।
अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ॥ **3.34.10** ॥

ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ **3.34.11** ॥

एका कथञ्चिन्मुक्ताहं परिभूय महात्मना।
स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥ **3.34.12** ॥

भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः।
अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ **3.34.13** ॥

अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान् बली।
रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ **3.34.14** ॥

रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना।
धर्मपत्नी प्रिया नित्यं भर्तुः प्रियहिते रता ॥ **3.34.15** ॥

सा सुकेशी सुनासोरूः सुरूपा च यशस्विनी।
देवतेव वनस्यास्य राजते श्रीरिवापरा ॥ **3.34.16** ॥

तप्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा।
सीता नाम वरारोहा वैदेही तनुमध्यमा ॥ **3.34.17** ॥

नैव देवी न गन्धर्वी न यक्षी न च किन्नरी।
तथारूपा मया नारी दृष्टपूर्वा महीतले ॥ **3.34.18** ॥

यस्य सीता भवेद् भार्या यं च हृष्टा परिष्वजेत्।
अभिजीवेत् स सर्वेषु लोकेष्वपि पुरन्दरात्॥ **3.34.19** ॥

सा सुशीला वपुःश्लाघ्या रूपेणाप्रतिमा भुवि।
तवानुरूपा भार्या सा त्वं च तस्याः पतिर्वरः॥ **3.34.20** ॥

तां तु विस्तीर्णजघनां पीनोत्तुङ्गपयोधराम्।
भार्यार्थे तु तवानेतुमुद्यताहं वराननाम्॥ **3.34.21** ॥

विरूपितास्मि क्रूरेण लक्ष्मणेन महाभुज।
तां तु दृष्ट्वाद्य वैदेहीं पूर्णचन्द्रनिभाननाम्॥ **3.34.22** ॥

मन्मथस्य शराणां च त्वं विधेयो भविष्यसि।
यदि तस्यामभिप्रायो भार्यात्वे तव जायते।
शीघ्रमुद्ध्रियतां पादो जयार्थमिह दक्षिणः॥ **3.34.23** ॥

रोचते यदि ते वाक्यं ममैतद् राक्षसेश्वर।
क्रियतां निर्विशङ्केन वचनं मम रावण॥ **3.34.24** ॥

विज्ञायैषामशक्तिं च क्रियतां च महाबल।
सीता तवानवद्याङ्गी भार्यात्वे राक्षसेश्वर॥ **3.34.25** ॥

निशम्य रामेण शरैरजिह्मगै -
हताञ्जनस्थानगतान् निशाचरान्।
खरं च दृष्ट्वा निहतं च दूषणं
त्वमद्य कृत्यं प्रतिपत्तुमर्हसि॥ **3.34.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुस्त्रिंशः सर्गः॥